खण्डश्च महाबलः । एकपादेकचक्रश्च विरूपाक्षमहोदरौ । निचन्द्रश्च निकुम्भश्च कुजटः कपटस्तथा । शरभः शलभश्चैव सूर्य्यचन्द्रमसौ तथा । एते ख्याता दनोर्वंशे दानवाः परिकीर्त्तिताः । अन्यौ तु खलु देवानां सूर्य्याचन्द्रमसौ स्मृतौ । अन्यौ दानवमुख्यानां सूर्य्यचन्द्रमसौ तथा । इमे च वंशाः प्रथिताः सत्त्ववन्तो महाबलाः । दनुपुत्रा महाराज ! दश दानववंशजाः । एकाक्षोऽमृतपो वीरः प्रलम्बनरकावपि । वातापिः शत्रुतपनः शठश्चैव महासुरः । गविष्ठश्च वनायुश्च दीर्घजिह्वश्च दानवः । असंख्येयाः स्मृतास्तेषां पुत्राः पौत्राश्च भारत !" भा॰ आ॰ ६५ अ॰ । दनोरपत्यम् अण् । दानव दनोरपत्ये पुंस्त्री स्त्रियां ङीप् ।

**दनायु** पु॰ दानवभेदे दानवशब्दे दृश्यम् । अयं शब्दः दनायुस् शब्दात् प्राक् पाठ्यः ।

**दनुज** पु॰ दनोर्जायते जन–ड । दनोरपत्ये असुरे अमरः ।

**दनुजद्विष्** पु॰ दनुजान् द्वेष्टि द्विष–क्विप् । देवे हेम॰ । दनुजारिप्रभृतयोऽप्यत्र ।

**दनुसूनु** पु॰ ६त॰ । दानवे जटाधरः ।

**दन्त** पु॰ अन्तर्भावितण्यर्थे दम–तन् । १मुखान्तःस्थचर्वणसाधनेऽस्थिभेदे (दाँत) २कुञ्जे, ३पर्वतनितम्बे ४सानुनि, ५द्वात्रिंशत्संख्यायाञ्च मेदि॰ । अत एव नैषध॰ दन्तानां द्विगुणितषोड़शपदार्थरूपत्वेन भङ्ग्या द्वात्रिंशत्त्वं वर्णितं यथा । "उद्देशपर्वण्यपि लक्षणेऽपि द्विधोदितैः षोड़शभिः पदार्थैः । आन्वीक्षिकीं यद्दशनद्विमालीं तां मुक्तिकामाकलितां प्रतीमः" । ६शैलशृङ्गे त्रिका॰ (155) कूपे ७पञ्चमात्राप्रभेदे छन्दोग्र॰ सदन्ततया जन्मनि जन्मोत्तरं मासभेदे च तज्जन्मफलं ज्यो॰ त॰ उक्तं यथा "जातः सदन्तः पितृमातृहन्ता तातं निहन्यात् प्रथमे तु मासे । अम्बां द्वितीये सहजं तृतीये मासे चतुर्थे शुभकारकः स्यात् । मिष्टान्नभोजी सुभगः सुताख्ये५ षष्ठे सुखी पण्डितकल्पबुद्धिः । ततोऽधिकः स्यात् बलवान् द्युनाख्ये७ मासेऽष्टमे वित्तसुखैर्विहीनः । सुरप्रतापी नवमे मृत्युश्च दशमे तथा । एकादशे द्वादशे च सुखी च सुभगो भवेत् । अष्टौ पुत्तलकान् कृत्वा सुगन्धैर्गन्धकैस्तथा । स्रोतःसु संक्रमे चापि स्नापयेत् शुक्लपुष्पकैः । स्नानं संक्रमणस्याधः शम्भोर्दर्शनमन्ततः । होमं विप्रार्च्चनञ्चैव अशुभे दन्तदर्शने" । "स्निग्धा घनाश्च दशनाः सुतीक्ष्णदंष्ट्राः समाश्च शुभाः" वृ॰ स॰ ६७ अ॰ । दन्तमूलप्रादुर्भावश्च गर्भोपनिषदि गर्भे सप्तममासे जायते इति प्रतिपादितम् ।

**दन्तक** त्रि॰ दन्ते दन्तमार्ज्जने प्रसितः कन् । १दन्तमार्जनप्रसिते । दन्त इव कन् । २शैलशृङ्गे गिरेः प्रदेशाद्बहिर्निर्गते ३पाषाणभेदे च हेमच॰ । स्वार्थे क । ४दन्तशब्दार्थे पु॰ ।

**दन्तकर्षण** पु॰ दन्तान् कर्षति कृष–ल्यु । जम्बीरे शब्दर॰ ।

**दन्तकाष्ठ** न॰ दन्तधावनार्थं काष्ठम् । १दन्तधावने काष्ठे । तत्काष्ठमस्त्यत्र साध्यतया अच् । २विकङ्कतवृक्षे पु॰ राजनि॰ । सफलतत्काष्ठभेदाः वृ॰ स॰ ८५ अ॰ उक्ता यथा

"वल्लीलतागुल्मतरुप्रभेदैः स्युर्दन्तकाष्ठानि सहस्रशो यैः । फलानि वाच्यान्यतितत्प्रसङ्गो मा भूदतो वच्म्यथ कामिकानि । अज्ञातपूर्वाणि न दन्तकाष्ठान्यद्यान्न पत्रैश्च समन्वितानि । न युग्मपर्वाणि न पाटितानि न चोर्ध्वशुष्काणि विना त्वचा वा । वैकङ्कतश्रीफलकाश्मरीषु ब्राह्मी द्युतिः क्षेमतरौ सुदाराः । वृद्धिर्वटेऽर्के प्रचुरं च तेजः पुत्रा मधूके ककुभे प्रियत्वम् । लक्ष्मीः शिरीषे च तथा करञ्जे प्लक्षेऽर्थसिद्धिः समभीप्सिता स्यात् । मान्यत्वमायाति जनस्य जात्यां प्राधान्यमश्वत्थतरौ वदन्ति । आरोग्यमायुर्बदरीबृहत्योरैश्वर्यवृद्धिः खदिरे सबिल्वे । द्रव्याणि चेष्टान्यतिमुक्तके स्युः प्राप्नोति तान्येव पुनः कदम्बे । निम्बेऽर्थाप्तिः करवीरेऽन्नलब्धिर्भाण्डीरे स्यादिदमेव प्रभूतम् । शम्यां शत्रूनपहन्त्यर्जुने च श्यामायां च द्विषतामेव नाशः । सालेऽश्वकर्णे च वदन्ति गौरवं सभद्रदारावपि चाटरूषके । वाल्लभ्यमायाति जनस्य सर्वतः प्रियङ्ग्वपामार्गसजम्बुदाड़िमैः । उदङ्मुखः प्राङ्मुख एव वाब्दं कामं यथेष्टं हृदये निवेश्य । अद्यादनिन्द्यं च सुखोपविष्टः प्रक्षाल्य जह्याच्च शुचिप्रदेशे । अभिमुखपतितं प्रशान्तदिक्स्थं शुभमतिशोभनमूर्ध्वसंस्थितं यत् । अशुभकरमतोऽन्यथा प्रदिष्टं स्थितपतितं च करोति मृष्टमन्नम्" ।

आ॰ त॰ नरसिंहपुराणे च "दन्तकाष्ठस्य वक्ष्यामि समासेन प्रशस्तताम् । सर्वे कण्टकिनः पुण्याः क्षीरिणश्च यशस्विनः" । महाभारते । "तिक्तं कषायं कटुकं सुगन्धि कण्टकान्वितम् । क्षीरिणो वृक्षगुल्माद्यान् भक्षयेद्दन्तधावने" । निषिद्धकाष्ठानि यथा "गुवाकतालहिन्तालास्तथा ताड़ी च केतकी । खर्ज्जूरनारिकेलौ च सप्तैते तृणराजकाः । तृणराजशिरापत्रैर्यः कुर्य्याद्दन्तधावनम् । तावद्भवति चाण्डालो याव-